21:44 02:30 51%
hitaya.org/dharmasa
HOME VOLUME CALL FOR PAPERS ABOUT
HITAYA
ISSN : 2581-7787
BOARD CONTACT US

धर्मसञ्चारोक्तप्रकरणप्रमाणविमर्शः

महेश चिदम्बर भट्टः
सहायकाचार्यः
कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, असमः
soolgarcmaheshbhat@gmail.com
Mo:- 8762917602

लेखसारः –

अङ्गताबोधकप्रमाणेषु अन्यतमं प्रमाणं भवति प्रकरणम्- एतस्य लक्षणम्, तस्य भेदाः, विनियोगप्रकारः इत्येवं विचारः अत्र निरूपितः वर्तते। रघुपतिसूरिणा धर्मसञ्चारः इत्याख्यः ग्रन्थः अलेखि। तत्र विद्यमानाः पूर्वोक्तविचाराः अस्मिन् लेखे न्यरूप्यन्त। एवं भाटदीपिकायां विद्यमानः यः प्रकरणविचारः तत्रापि विशेषतः प्रकरणस्य विनियोजकताधिकरणे विद्यमानविचाराः अत्र प्रदर्शिताः सन्ति। अनेन प्रकरणप्रमाणं सुलभेन अवगतं भवति।

कूटशब्दाः –

अङ्गताबोधकप्रमाणम्, प्रकरणम्, लक्षणम्, धर्मसञ्चारः, रघुपतिसूरिः.

लेखः –

भगवान् जैमिनिः धर्मविवेकाय विवेकिनामुपकाराय च द्वादशलक्षणीत्यपरनामधेयं मीमांसाशास्त्रं ग्रन्थे निबबन्ध। तत्र प्रमाणभेदशेषत्वप्रयुक्तिक्रमाधिकार-सामान्यातिदेशविशेषतोऽतिदेशोहबाधतन्त्रप्रसङ्गाख्यान् विषयान्क्रमेण द्वादशस्वध्यायेषु व्यचारीत्। तदुक्तम् :-

धर्मोद्वादशलक्षण्या व्युत्पाद्यस्तत्रलक्षणैः ।

प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः ॥

अधिकारोऽतिदेशश्च सामान्येन विशेषतः ।

ऊहोबाधश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात् ॥ इति॥[1]

तत्र तृतीयाध्याये अङ्गाङ्गीभावबोधकविनियोगविधिः व्यचार्यत । विनियोगविधिसहकारिभूतानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याख्यानि षट्प्रमाणानि प्रथमद्वितीयतृतीयपादेषु न्यरूपिषत । तत्र तृतीयपादस्य चतुर्थाधिकरणे प्रकरणम् न्यरूपयि । अङ्गप्रधानोभयगातपरस्परकाङ्क्षा एव प्रकरणमित्युच्यते । यथा **समिधो यजति , तनूनपातं यजती[2]**त्यादिषु प्रयाजादिवाक्येष्विष्टविशेषस्य अनिर्देशात् किं भावयेदित्युपकार्याकाङ्क्षा , **दपूर्णमासाभ्यां स्वर्गकामो यजेत** इति दर्शपूर्णमासाधिकारवाक्ये दर्शपूर्णमासाभ्यां स्वर्गं कथं भावयेदित्युपकारकाकङ्क्षा , इत्थञ्चोभयाकाङ्क्षया प्रयाजादीनां दर्शपूर्णमासाङ्गत्वं ज्ञायते । अत्र सन्देहः :- प्रयाजादीनां प्रधानार्थत्वं किमर्थमुच्यते , तेषां स्वतन्त्रफलार्थत्वमेव भवत्विति । प्रयाजादिवाक्ये इष्टविशेषस्यानिर्देशे अपि फलमन्तरेण विधिश्रुत्यनुपपत्तेः फलं त्ववश्यं कल्पनीयम् । तत्र विश्वजिन्न्यायेन स्वर्गः फलत्वेन कल्पनीयः , तदुक्तम् :- **स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वादिति[3]**। अथवा रात्रिसत्रन्यायेन आर्थवादिकं फलं कल्पनीयम् । तथा च प्रयाजादीनां विश्वजिन्न्यायेन स्वर्गार्थत्वमथवा रात्रिसत्रन्न्यायेन[4] **वर्म वा एतद्यज्ञस्य क्रियते यत्प्रयाजानूयाजा इज्यन्ते वर्म यजमानाय भ्रातृव्याभिभूत्या** इति अर्थवादोपस्थापितभ्रातृव्याभिभूतिरूपफलार्थत्वं वक्तव्यमिति । तत्रोच्यते :- प्रयाजादीनां स्वतन्त्रफलार्थत्वमन्यतराकाङ्क्षारूपस्थानप्रमाणेन स्यात् । दर्शपूर्णमासार्थत्वे तु